**समष्टि** स्त्री सम्+अश–व्याप्तौ क्तिन्। १सम्यग्व्याप्तौ २समस्ततायाञ्च। कर्त्तरि क्तिच्। ३संघीभूते समस्ते पदार्थे वेदान्तसा० "समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात्। तदभावात्तदन्ये तु ज्ञायन्ते व्यष्टिसंज्ञया" पञ्चद०।

**समष्ठि(ष्ठी)ल** पु० समं तिष्ठति स्था–इलच् पृषो० षत्वं वा दीर्घः। (गुँड़िया) शाके अमरः।

**समसन** न० सम्+अस-ल्युट्। १समासे २संक्षेपे अमरः।

**समसूत्रपातन्याय** पु० न्यायभेदे समतया सूत्रस्य पातने यस्य तल्लग्नत्वमेवमुपर्य्यधःस्थितानां ग्रहाणां तत्सूत्रसंलग्नैकदेशकालावच्छेदेन सद्भावस्थानं येन ज्ञाप्यते तादृशे न्याये "परः सन्निकर्षस्य उपर्य्यधोभावापन्नसमसूत्रपातन्यायेन राश्येकांशावच्छेदेन सद्भावस्थानरूप." ति०त० रघु०।

**समस्त** त्रि० सम्+अस–क्त। १संक्षिप्ते २सकले अमरः। ३व्याकरणोक्ते कृतसमासे शब्दभेदे च।

**समस्थ** त्रि० समं तिष्ठति स्था-क। समभावेन तुल्यतया स्थिते

**समस्थली** स्त्री कर्म०। अन्तर्वेदिदेशे हेमच०।

**समस्या** स्त्री समस्यते संक्षिप्यतेऽनया सम्+अस–करणे क्यप्। संक्षेपेण उक्तस्य श्लोकपादादेः परकृतेन स्वकृतेन वा अवशेषेण भागान्तरेण संघटनार्थं कृते प्रश्ने अमरः।

**समा** स्त्री समयति विकलयति भावान् सम-अच्–टाप्। वत्सरे अमरकृतास्य नित्यबहुवचनान्तताङ्गीकृता पाणिनिना तु "समांसमां विजायते" इति सूत्रे एकवचनान्तता निर्दिष्टा।

**समांसमीना** स्त्री समां समां विजायते प्रसूते ख नि० अत्र समांसमामित्यत्र कालाधारे द्वितीया। प्रतिवर्षं प्रसूतायां गवि अमरः।

**समाकर्षिन्** पु० सम्+आ+कृष–णिनि। १अतिदूरगामिनि गन्धे अमरः। २सम्यगाकर्षणकर्त्तरि त्रि० स्त्रियां ङीप्।

**समाख्या** स्त्री समाख्यायतेऽनया सम्+आ+ख्या–अङ्। १कीर्त्तौ अमरः २संज्ञायाञ्च। ३योगेनार्थबोधने "स्थानं क्रमो योगबलं समाख्या" शास्त्रदीपिका।

**समाघात** पु० समाहन्यतेऽत्र सम्+आ+हन-आधारे घञ्। १युद्धे अमरः। भावे घञ्। २सम्यग्घाते च।

**समाज** पु० सम्+अज-घञ् न वीभावः। पशुभिन्नानां १समूहे अमरः। २सभायां हेमच० ३हस्तिनि नानार्थकोषः।

**समादान** न० सम्+आ+दा–भावे ल्युट्। १सम्यगादाने कर्मणि ल्युट्। २बौद्धानां निजकर्मणि मेदि०।

**समाधा** स्त्री सम्+आ+धा–अङ्। १निष्पत्तौ २विवादभञ्जने २पूर्वपक्षस्य सम्यगुत्तरानुगुणसिद्धान्तानुकूलतर्कादिना सम्यगर्थावधारणे च। ल्युट्। समाधानमप्यत्र न०। तत्र ध्येयवस्तुनि चित्तस्य निरन्तरस्थापनरूपे समाधौ च।

**समाधि** पु० सम्+आ+धा-कि। १समाधायां ध्येयवस्तुनि एकाग्रतया मनसःस्थापनरूपे २ध्यानभेदे ३वचनाभावे ४नियमे च अमरः। ध्यानभेदश्च समाधिः यथोक्तं पात० सू० "तत्र प्रत्ययैकतानता ध्यानम्" सू० "तस्मिन् देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृशप्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्" भा० "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" सू० "ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते" भा० "ध्यानसाध्यं समाधिं लक्षयितुं व्याचष्टे ध्यानमेवेति। ध्येयाकारनिर्भासमिति ध्येयाकारस्य निर्भासो न ध्यानाकारस्येति अतएवाह शून्यमिति। ननु शून्यं चेत् कथं ध्येयप्रकाशक इत्यत आह इवेति। अत्रैव हेतुमाह ध्येयस्वभावावेशादिति। अत्रापि पुराणम् "तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्। मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते" इति। ध्येयात् ध्यानस्य भेदकल्पना तद्धीनमित्यर्थः" विवर०।

एकाग्रतात्मकसमाधिलक्षणं पुराणान्तरोक्तं यथा "नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम्। तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम्। अहंब्रह्मेत्यवस्थानं समाधिरिति गीयते" गारुडे ४४अ०। "द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः। तुष्येत संयतो मुक्तः समाधिः सोऽभिधीयते। ध्येयमेव हि सर्वस्य ध्याता तन्मयतां गतः। पश्यति द्वैतरहितं समाधिः सोऽभिधीयते" २४०अ०। "इमं गुणसमाहारमनात्मत्वेन पश्यतः। अन्तःशीतलता यस्य समाधिरिति कथ्यते" योगवाशिष्ठे उपशमप्रक०। ५अर्थालङ्कारभेदे अलङ्कारशब्दे ४०६ पृ० दृश्यम्। ६इन्द्रियनिरोधे शब्दर०। ७काव्यगुणभेदे मेदि० "श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः। इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः। एषां विपर्य्ययः प्रायो दृश्यते गौडवर्त्मनि" काव्याद०। तस्यौजस्यन्तर्भावः सा०द० उक्तो यथा "श्लेषः समाधिरौदार्य्यं प्रसाद इति ये पुनः। गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते"। समाधिरारोहावरोहक्रमरूपः।